# Shri Sharadamba Stuti

# શ્રીશારદામ્બા સ્તુતિઃ

## Document Information

Text title : Sharadamba Stuti

File name : shAradAmbAstutiH.itx

Category : devii, varadAnanda

Location : doc_devii

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : May 19, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 19, 2023

*sanskritdocuments.org*

# શ્રીશારદામ્બા સ્તુતિઃ

ૐ શ્રી ।

શ્રીશઙ્કર ।

(શાર્દૂલવિક્રીડિત)

શ્રીમચ્છઙ્કરદેશિકેન્દ્રભગવત્ સમ્પૂજિતામુત્તમાં
લક્ષ્મ્યાદિત્રિતયાન્વિતાં સુખમયીં શ્રીચક્રયન્ત્રસ્થિતામ્ ।
વિશ્વોત્પત્તિલયસ્થિતિં વિદધતીં શ્રીરાજરાજેશ્વરીં
શૃઙ્ગેરીપુરવાસિનીં ભગવતીં શ્રીશારદામ્બાં ભજે ॥ ૧॥

દ્વૈતાદ્વૈતમતાનુયાય્યભિમતાં વિદ્વદ્વરૈર્વન્દિતાં
સર્વૈર્દર્શનસઙ્ગ્રહૈર્વિરચિતખ્યાતક્કણન્નૂપુરામ્ ।
મોહધ્વાન્તવિનાશિનીં કલિમલપ્રધ્વંસિનીં તારિણીં
શૃઙ્ગેરીપુરવાસિનીં ભગવતીં શ્રીશારદામ્બાં ભજે ॥ ૨॥

વેદોદ્યાનવિહારિણીં ઉપનિષત્તત્ત્વાર્થસંરક્ષિણીં
નાનાશાસ્ત્રકલાપિનીં મુખલસદ્ બ્રહ્મપ્રભાશોભિનીમ્ ।
તુઙ્ગાતીરસમુલ્લસદ્વનભુવાં સૌન્દર્યમાસ્વાદિનીં
શૃઙ્ગેરીપુરવાસિનીં ભગવતીં શ્રીશારદામ્બાં ભજે ॥ ૩॥

રત્નાભૂષણભૂષિતાં સ્મિતમુખીં દિવ્યામ્બરાલઙ્કૃતાં
વાણીં કામદુહાં વરાભયકરાં પ્રેમપ્રસન્નાનનામ્ ।
વાત્સલ્યામૃતવર્ષિનેત્રયુગુલાં સર્વાત્મિકાં ચિન્મયીં
શૃઙ્ગેરીપુરવાસિનીં ભગવતીં શ્રીશારદામ્બાં ભજે ॥ ૪॥

ભાવાકર્ષકહેમકાન્તિમતુલાં દિવ્યપ્રભાભાસ્વરાં
ભક્તાનાં વરદાયિનીં શુભકરીં સચ્ચિત્સુખાન્દોલિનીમ્ ।
સર્વાપન્નગવજ્રસન્નિભપદાં વન્દ્યાં જગન્માતરં
શૃઙ્ગેરીપુરવાસિનીં ભગવતીં શ્રીશારદામ્બાં ભજે ॥ ૫॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતા શ્રીશારદામ્બાસ્તુતિઃ સમ્પૂર્ણા ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri Sharadamba Stuti*

pdf was typeset on May 19, 2023

Please send corrections to *sanskrit@cheerful.com*